यथा"अपि नःस कुले जायात् यो नो दद्यात् त्रयोदशीम्। पायसं मधुसर्पिर्भ्यां प्राक्छाये कुञ्जरस्य च" मनुव्याख्यायाम् "प्रकृतायां त्रयोदश्यां तथा तिथ्यन्तरेऽपि हस्तिनः पूर्वां दिशं गतायां छायायां मधुघृतसंयुक्तं पायसं दद्यात्। न तु त्रयोदशीहस्तिच्छाययोः समुच्चयः यथाह विष्णुः "अपि जायेत सोऽस्माकं कुले कश्चिन्नरोत्तमः। प्रावृट्काले ऽसिते पक्षे त्रयोदश्यां समाहितः। मधूत्कटेन यः श्राद्धं पायसेन समाचरेत्। कार्त्तिकं सकलं वापि प्राक्छाये कुञ्जरस्य च"। इत्युक्तम् तेनास्य पृथङ्निमित्तता। अन्ये तु "राहुर्वै हस्ती भूत्वा चन्द्रमसं गृह्णातीति" श्रुतेः कुञ्जररूपस्य राहोश्छायायत इति व्युत्पत्त्याग्रहणपरतामाहुः। गजच्छायादयोऽप्यत्र

**कुञ्जरदरी** स्त्री० कूर्म्मविभागे बृहत्सं० दक्षिणस्यामुक्ते देशभेदे "अथ दक्षिणे लङ्केत्युपक्रमे "कच्छोऽथ कुञ्जरदरी सताम्रपर्णीति विज्ञेयाः"।

**कुञ्जरपिप्पली** स्त्री कुञ्जरोपपदा पिप्पली शा० त०। गजपिप्पल्याम् राजनि०। गजपिप्पल्यादयोऽप्यत्र स्त्री

**कुञ्जरा** स्त्री कुञ्जः हस्तिदन्त इव पुष्पमस्त्यस्या अच्। १धातकीद्रुमे (धाइफुल) तस्या हस्तिदन्तशुभ्रपुष्पत्वात्तथात्वम् २पाटलावृक्षे च मेदि०। अजादि० टाप्। ३हस्तिन्याम् शब्दचि०। जातित्वात् ङीष्। कुञ्जरीत्येव त्रिका०

**कुञ्जराराति** पु० ६त०। शरभे अष्टापदे पशुभेदे हेमच०। २सिंहे च

**कुञ्जरालुक** न० हस्त्यालुके आलुकभेदे शब्दच०। [अमरः

**कुञ्जराशन** पु०कुञ्जरैरश्यते अश—भक्षे कर्म्मणि ल्युट्। अश्वत्थवृक्षे

**कुञ्जरासन** न० कुञ्जरस्येवासनमत्र। "अथ वक्ष्ये महाकाल! कुञ्जरासनमुत्तमम्। करद्वयेन पादाभ्यां भूमौ तिष्ठेत् शिरःकरः" इति रुद्रयामलोक्ते आसनभेदे

**कुञ्जल** न० कुञ्जितं जलं यत्र पृषो०। काञ्जिके। (आमानि) अमरः [राजनि०।

**कुञ्जवल्लरी** स्त्री कुञ्जाकारा वल्लरी। निकुञ्जिकाम्लावृक्षे

**कुञ्जादि** पु०गोत्रे चफञ्प्रत्ययप्रकृतिभूते शब्दगणे स च गणः कुञ्ज ब्रध्न शङ्ख भस्मन् गण लोमन् शठ शाक शुण्डा शुभंविपाश स्कन्द स्कम्भ"।

**कुट** कौटिल्ये तुदा० पर० सक० सेट् कुटादि कुटति अकुटीत् चुकोट। कुटिता कुटितं कुटितव्यम्। कुटिलः प्रनिकुटति उद्+उत्थितौ अक० वि+कुत्सने सक०। विकुटितः कुत्सितः।

**कुट** प्रतापने चुरा०आत्म० सक० सेट्। कोटयते अचूकुटत।

**कुट** वैकल्ये भ्वा० इदित् प०अक० सेट्। कुण्टति अकुण्टीत्।

**कुट** कुट्टने (कोटा) दिवा० अक० सेट्। कुट्यति अकोटीत् "जीवनं कुट्यतीव"। "भक्षयन्ति स्वमांसानि प्रकुट्य विधिवत्तथा" भा०आ०२६४२ श्लो०

**कुट** पु० कुट—क। १कोटे (गड) मेदि० २शिलाकुट्टे (पाथर भाङ्गाहातुडी) ३वृक्षे च हेम० ४पर्व्वते हारा०५कलशे पु०न० अम० ६ऋषिभेदे पु०ततः गोत्रापत्ये अश्वा० फञ्। कौटायन तद्गोत्रापत्ये पुंस्त्री अनन्तरापत्ये तु कुर्व्वा० ण्य। कौट्य तदपत्ये पुंस्त्री० "हविषा जारो अपांसि पर्त्ति पपुरिर्नरा पिता कुटस्य चर्षणिः" ऋ० १,४६,४

**कुटक** पु० दक्षिणस्यदेशभेदे, "चङ्क्रममाणः कोङ्कवेङ्कटकुटकान् दक्षिणकर्णाटान् यदृच्छयोपगतः कुटकाचलोपवने" भाग० ५,६,८, "यस्य (ऋषभदेवस्य) किलानुचरितमुपाकर्ण्य कोङ्कवेङ्कुटकानां राजार्हन्नामोपशिक्ष्य कलावधर्म्म उत्कृष्यमाणे भवितव्येन विमोहितः स्वधर्म्मपथमकुतोभयमपहाय कुपथपाषण्डमसमञ्जसं निजमनीषया मन्दः संप्रवर्त्तयिष्यति" तत्रैव १०श्लो०,। तद्देशाधिपति र्जिनाचार्य्यः। कुटकदेशस्थोऽचलः कुटकाचलः तत्रत्यपर्व्वत भेदः। २फाले न० शब्दचि०

**कुटङ्क** पु० कुर्गृहभूमिः टङ्क्यते आच्छाद्यतेऽनेन टकि—आच्छादने करणे घञ् ६त०। गृहाच्छादने तृणादौ (चाल) शब्दमा०

**कुटङ्गक** पु० कुटस्याङ्गमिव शक० इवार्थे क। १छदिषि पटले (चाल) हेमच०पत्रादिच्छादिते २गृहभेदे (कुँडे) राय०

**कुटच** पु०कुटइव ठीयते चि—ड। कुटजवृक्षे (कुरची) शब्दचन्द्रि०

**कुटज** पु० कुटे पर्व्वते जायते जन—ड। (कुरची) १वृक्षभेदे अमरः। "कुटजः कटुको रूक्षो दीपनस्तुवरो हिमः। अर्शोऽतीसारपित्तास्रकफतृष्णामकुष्ठनुत्" भावप्र० तत्गुणा-
व्युक्ताम्। "कुटजः कूटजः कौटो वत्सको गिरिमल्लिका। कालिङ्गः शक्रशाखा च मल्लिकापुष्प इत्यपि। इन्द्रयवफलः प्रोक्तो वृक्षकः पाण्डुरद्रुमः" इति भावप्र० तत्पर्य्याये इन्द्रयवफलत्वोक्तेः तत्फलस्य इन्द्रयवनामता "कुटजपुष्पपरागकणाः स्फुटम्" माघः "अलिरसौ नलिनीवनवाल्लभः कुमुदिनीकुलकेलिकलालसः। विधिवशेन विदेशमुपागतः कुटजपुष्परसं बहु मन्यते" कुटे घटे जायते। २अगस्त्यमुनौ ३द्रोणाचार्य्ये च मेदि० तयोस्तदुत्पत्तिकथा कुम्भजशब्दे वक्ष्यते।